|| શ્રી યંત્રોદ્ધારક સ્તુતિઃ ||

નમામિ દૂતં રામસ્ય |
સુખદં ચ સુરદ્રુમમ |
પીનવૃત્તમહાબાહું |
સર્વશત્રુનિવારણમ || ૧ ||

નાનારત્નસમાયુક્ત |
કુણ્ડલાદિ વિરાજિતં |
સર્વદાભીષ્ટદાતારં |
સતાં વૈ દૃઢમાહવે || ૨ ||

વાસિનં ચક્રતીર્થસ્ય |
દક્ષિણસ્થગિરૌસદા |
તુંગાંબોધિતરઙ્ગસ્ય |
વાતેન પરિશોભિતે || ૩ ||

નાનાદેશાગતૈસ્સદ્ભિઃ |
સેવ્યમાનં નૃપોત્તમૈઃ |

www.yousigma.com

ધૂપ દીપાદિ નૈવેદ્યૈઃ |
પંચખાદ્યૈશ્ચ શક્તિતઃ || ૪ ||

ભજામિ શ્રી હનૂમંતમ |
હેમકાંતિ સમપ્રભં |
વ્યાસતીર્થ યતીંદ્રેણ |
પૂજિતં પ્રણિધાનતઃ || ૫ ||

ત્રિવારં યઃ પઠેન્નિત્યં |
સ્તોત્રં ભક્તાદ્વિજોત્તમઃ |
વાંછિતં લભદેઽભીષ્ટં |
ષણ્માસાભ્યંતરે ખલુ || ૬ ||

પુત્રાર્થિર્લભતે પુત્રં |
યશાર્થિર્લભતે યશઃ |
વિદ્યાર્થિર્લભતે વિદ્યાં |
ધનાર્થિર્લભતે ધનં || ૭ ||

સર્વથા માસ્તુસંદેહો |

www.yousigma.com

હરિઃસાક્ષી જગત્પતિઃ |

યઃ કરોત્યત્ર સંદેહં |

સ યાતિ નરકં ધ્રુવમ || ૮ ||

www.yousigma.com